This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

323

5399 | i, ii, iii

॥श्री॥अथगोत्रप्रवरनिर्णयप्रारंभः॥

KKSU LIBRARY
RAMTEK
441 106
M-871
Dist Nagpur

Checked 2012

Accession No. - 5399 /i-iii M871
Title :- i) गोत्रप्रवरनिर्णय
ii) गोत्र निर्णय
iii) प्रवरमञ्जरी तानि ...
Subject :- धर्मशास्त्र
Author :- i) ...नाथ
ii) बुद्धिविलासी
iii)

पत्रे - 32 30

(9)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः॥ अथ प्रवरनिर्णयः॥ साक्षाद्दक्षमधिक्षदेशिक मि
वक्ष्मामंडलासेरुतिं प्राप्य श्रीगुरु विश्वनाथमुदयी सर्वज्ञयज्ञेश्वरः॥ जा
तोन्वर्थविशेषणस्य कुलजः श्रीपद्मनाभाभिधः शिष्यः श्रुत्ययबृंहितार्थ
कुशलः स्कृत्वा गुरून्स्त्रीन मून्॥१॥ विघ्नेशं शारदां शंभुं विधिं विष्णुं दिवाक
रं॥ प्रणम्य विदुषो वक्ष्ये गोत्रप्रवरनिर्णयः॥२॥ भृग्वंगिरः कश्यपात्रि वि
श्वामित्रवसिष्ठकाः॥ अगस्त्यो गोत्रकृन्मुख्यास्तेषां वंशा अनेकशः॥३॥
तत्राष्टादौ भृगोर्वंशाः प्रवरायत्र सूचिताः॥ आद्या जामदग्न्यवत्सा जामदग्न्या
र्ष्टिषेणकौ॥४॥ विदायस्कास्तथा त्ववेतामित्रयुक्कुशौनकादयः॥ तेषामाद्या
श्चतुर्वंशा विवाहे नान्वयुर्मिथः॥५॥ स्वगणस्थैर्यथान्ये तु चत्वारोयस्कमुख्य
काः॥ स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः॥६॥ ॥तत्राश्वलायनापस्तं १
बबोधायनकात्यायनकृतान्सूत्रग्रंथांस्तथा महाप्रवरज्योतिःशास्त्रस्मृत्य
र्थसारादि सभ्रत्यादिग्रंथानालोक्यादौ प्रवरनिर्णयो यथाशक्ति निरूप्य
ते॥ जामदग्न्यवत्स१ श्रीवत्स२ वत्स३ ऐतिशायन४ वैरोहित्य५ मांडव्य६ मंडूक७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांडूकेय ८ मार्कंडेय ९ पाणिनी १० वाल्मिक्या ११ दीनामपि पंचप्रवराः ॥ भार्ग
वच्यावन आप्नवान और्व जामदग्न्या इति ॥ ॥ अथ शुद्ध जामदग्न्यानां त्रयः प्र
वरपुरुषाः ॥ भार्गवच्यावन आप्नवाना इति ॥ आर्ष्टिषेणादीनां पंचप्रवराः ॥
भार्गवच्यावन आप्नवान आर्ष्टिषेण अनूपा इति ॥ बिदवट प्राचीनयोग्यादी
नां पंचप्रवराः ॥ भार्गवच्यावन आप्नवान और्व बैदा इति ॥ ४ ॥ अथ चतुर्गण
स्थानां ऋषीणां प्रवरपुरुषसहितानां पौनरुक्त्यपरिहारेण नामानुक्रमो
लिख्यते ॥ जामदग्न्यवत्स १ श्रीवत्स २ वत्स ३ ऐतिशायन ४ वात्स्यायन ५ बैरो
हित्य ६ मांडव्य ७ मांडूक ८ मांडूकेय ९ मार्कंडेय १० पाणिनी ११ वाल्मीकी १२ भा
र्गव १३ च्यावन १४ आप्नवान १५ और्व १६ जामदग्न्य १७ ऋष्टिषेण १८ आर्ष्टि
षेण १९ अनूप २० बिदवद २१ प्राचीनयोग्य २२ बेदादयश्चतुर्गणस्थाः
सप्रवराः परस्परमतेन विवाह्याः ॥ विश्वामित्रदत्तकपुत्राणां देवरातानां
मातामहीयैः शुद्ध जामदग्न्यैर्न विवाहः ॥ तथाचोक्तं गत्सपद्धलावादिस्मरणां ॥
जामदग्न्य विश्वामित्राणां देवरातवर्ज्यं मिथो विवाहोस्तीति ॥ विवाहो जाम

दग्न्येस्क विश्वामित्रे सहोदितः॥ देवरातान्वर्जयित्वा शुद्धैः समुद्दि
तो ध्रुवं॥ प्रथम गण चतुष्टयं॥ याभ्य १ यस्क २ वाधुळ ३ मौक्ष ४ मौनस ५
मौक ६ शार्कराक्षी ७ सार्ष्टि ८ सावर्णी ९ शालंकायन १० जैमिनी ११ जैवंत्या
यनी १२ जाबाल्या १३ दीनां त्रयः प्रवराः॥ भार्गववैतहव्यसावेतसा इति॥
एते यस्कवंशाः भृगुगणस्थाः सप्रवराः॥ मिथो न विवाह्याः॥ शालंका
यनाय स्कवंशो विश्वामित्र कुले पि संति॥ प्रवरपुरुषे निर्णयः॥ एवम
न्यत्रापि॥ इति पंचमो गणः॥ श्येतादीनां त्रयः प्रवराः भार्गववैन्यपार्था
इति॥ एते श्येतादयः सप्रवराः मिथो न विवाह्याः॥ इति षष्ठो गणः॥ मित्र
युजादीनां वाध्र्यश्वेत्येकः प्रवरः॥ अथवा त्रयः प्रवराः॥ भार्गवदैवो
दासवाध्र्यश्वा इति॥ ते मित्रयुजादयः सप्रवराः मिथो न विवाह्याः॥ इ
ति सप्तमो गणः॥ शुनकादीनामेकप्रवरः गार्त्समदा इति॥ अथवा त्रयः
प्रवराः॥ भार्गवशौनहोत्र गार्त्समदा इति॥ एते शुनकादयः सप्रवराः मि
थो न विवाह्याः॥ इत्यष्टमो गणः॥ एवमुक्तं भवति॥ भार्गवाष्टगणेषु आ

(४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दितश्च तुर्गणानांप्रवरत्र्युरुषैः सहोक्तानांपरस्परंविवाहोनास्ति॥इतरेषांच
तुर्णांस्वस्वगणेनास्तिविवाहः शेषैस्त्रिभिर्विवाहोस्तीति पूर्ववत्तुर्गणेरपि॥अ
ष्टगणस्थानांसर्वेषांसर्वत्र भार्गवानुवृत्तेः भार्गवगोत्रियैर्नविवाहोस्त्येव॥उ
क्तंच॥आश्वलायनगृह्यप्रवरपरिशिष्टे॥भृगूणांनविवाहोस्तिचतुर्णामादि
तोमिथः॥त्र्येतादयस्त्रयस्तेषांविवाहोमिथइष्यते॥यस्कश्चैषांमिथइष्टो
विवाहः सर्वैरन्यैर्जामदग्न्यादिभिश्चेतिच॥तथाचस्मृत्यर्थसारे॥जामदग्न्या
वत्सविदावार्ष्टिषेणाः परस्परं॥नान्ययुः प्रवरैक्येनसगोत्रत्वेनचादिमे॥य
स्कामित्रयुजोवैन्याःशुनकाः प्रवरैक्यतः॥स्वंस्वंहित्वागणंसर्वेविवहेयुःपरा
वरैः॥ ॥इतिभार्गवप्रकरणंप्रथमंसमाप्तं॥ ॥कथ्यंतेथनवात्रैतेमुख्याआं
गिरसोगणाः॥तत्राप्यनेकेस्तोमास्युस्तानूक्रमेणाभिदध्महे॥१॥गौतम
श्चभरद्वाजः एषदभ्वश्चमुद्गलः॥ विष्णुवृद्धश्चकण्वश्चहरितः संकृ
तिः कपिः॥२॥नवैतेगणधौरेयाअंगिरोवंशसंभवाः॥वासिष्ठदत्तपुत्रत्वा
त्संकृतीनांद्विगोत्रता॥तेष्वप्यादौगौतमस्याष्टगणधौरेयानुक्रमः॥गौतमौ
चथ्यकौराहूगणस्यासोमराजकः॥वामदेववृहदुक्थौकक्षीवान्दीर्घता

(५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मसः॥ ॥अथैतेषांप्रवरविभागः कथ्यते॥गोतमानांत्रयः प्रवराः॥आंगि
रस१गोतम२आयास्य३इति॥उचथ्यआरद्दंतादीनांत्रयःप्रवराः॥आं
गिरसऔचथ्यआरद्दंता इति॥राहुगणकोमंडलादीनांत्रयःप्रवराः॥
आंगिरस१राहुगण्य२गोतमा३इति॥सोमराजकरेणुपालुलोगाक्ष्या
दीनांत्रयः प्रवराः॥आंगिरससौमराज्य२गोतमा३इति॥वामदेवा
नांत्रयःप्रवराः॥आंगिरस१वामदेव्य२गोतमा३इति॥बृहदुक्थौशनसा
दीनांत्रयः प्रवराः॥आंगिरस१बार्हदुक्थ्य२गोतमा३इति॥क्षीवदा
दीनांपंचप्रवराः॥आंगिरस१औचथ्य२गोतम३औशिज्य४काक्षी
वता५इति॥दीर्घतमसांत्रयः प्रवराः॥आंगिरस१गोतम२दीर्घतमसा३
इति॥आंगिरसगोतमाष्टगणेषु॥सप्रवरेषुपौनरुक्त्यपरिहारेण
नामानुक्रमोलिख्यते॥गोतम१आंगिरस२आयास्य३गोतम४उच
थ्य५आरद्दंत६औचथ्य७राहूगण८कोमंड९राहुगण्य१०सोमराजक११

६

रेणुपाल १२ लौगाक्षी १३ सौमराज्य १४ वामदेव १५ वामदेव्य १६ बृहदुक्थ्य १७
औशन १८ बार्हदुक्थ्य १९ कक्षीवान् २० औशिजक २१ काक्षीवंत २२ दीर्घत
म २३ दैर्घतमस २४ इत्यादयः॥ एषामांगिरसगौतमवंशानां द्वित्र्यार्षेय
नुवृत्तेः समानप्रवरगोत्रत्वात्परस्परं विवाहो नास्ति॥ तथा चोक्तं ग्र
न्थपरिशिष्टे॥ षण्णां वै गोतमादीनां विवाहो नेष्यते मिथः॥ दीर्घतमा
औचथ्यः काक्षीवांस्त्वेकगोत्रजाः॥ उत्तरार्द्धस्यायमर्थः॥ कक्षीव
द्दीर्घतमसां गोतमीयेनौचथ्येन समानगोत्रत्वं एवं तातत्समान
गोत्रियैः पंचभिर्गणैः सह कक्षीवद्दीर्घतमसोर्गणयोरपिनान्वय
रत्सष्टानां परस्परमांगिरसगौतमगणानां विवाहो नास्तीत्युक्तं भ
वति॥ औशनसा भार्गवगोतमेपि संति प्रवरैर्विवेचनीयाः एवं स
र्वत्रयोज्यं॥ ॥इति गोतमविवरणं॥ ॥अथांगिरसभरद्वाजाः॥ ॥भ
रद्वाजा आग्निवेश्या ऋक्षा गर्गा इतीरिताः॥ भरद्वाजगणा ह्येते च ख

(८)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तांप्रचक्ष्महे॥भरद्वाजकुक्षादीनांत्रयःप्रवराः॥आंगिरस१बार्हस्पत्य२
भारद्वाजाइति३अग्निवेश्याऔर्जायनासर्वेस्तंबस्तंभशाद्वाक्षुंगशौंगशै
त्रिर्यादीनांत्रयःप्रवराः॥आंगिरस१बार्हस्पत्य२भारद्वाजा३इति॥एषांभर
द्वाजप्रवरैक्येपिअवांतरधर्मभेदात्कुलभेदः॥अग्निवेश्यगणस्थानांशौं
गशैत्रिर्यादीनांद्विप्रवचनानांपंचप्रवराः॥आंगिरस१बार्हस्पत्य२भार
द्वाज३कासा४क्षीलेति५॥रूक्षरौक्षायणादीनांपंचप्रवराः॥आंगिरस१
बार्हस्पत्य२भारद्वाज३वांदन४मातवचसाइति५॥गर्गकपिलकपीरूक्षी
र्यादीनांपंचप्रवराः॥आंगिरस१बार्हस्पत्य२भारद्वाज३सैन्य४गार्ग्याइति५॥
अथवात्रयःप्रवराः॥आंगिरस१सैन्य२गार्ग्या३इति॥अथभरद्वाजत्तुर्ग ४
णस्थानांत्र्यार्षीणांसप्रवराणांपौनरुक्त्यपरिहारेणनामानुक्रमोक्तिरव्य
ते॥भरद्वाज१कुक्षु२आंगिरस३बार्हस्पत्य४भारद्वाज५आग्निवेश्य६औ
र्जायन७सर्वेस्तंब८स्तंभशाद्व९शुंग१०शौंग११शैशिरि१२रूक्ष१३रौक्षायण१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वांदन१५ मातवचस१६ गर्ग१७ कपिल१८ कपि१९ ऋक्षीरी२० सैन्य२१ गार्ग्या२२
दयः॥ एतेषां भरद्वाजचतुर्गणस्थानां समानप्रवरे सगोत्रत्वेनैकत्वं॥ भरो
द्वाक्षायणा भरद्वाजे विश्वामित्रेपि संति॥ प्रवरैर्विवेचनीयः॥ भारद्वाज
वंश्यगर्गकुलोत्पन्नाः कपयः पंचप्रवराः॥ अथांगिरसवंश्याः स्वतंत्राश्चा
न्येकपयस्त्रिप्रवराः॥ तेषां तेषां च प्रवरेण निर्णयः॥ आंगिरस१ बार्हस्प
त्य२ भरद्वाज३ ऋषित्रयानुवृत्तेः॥ परस्परं विवाहो नास्ति॥ तथा चोक्तं स्म
त्यर्थसारे॥ भरद्वाजा आग्निवेश्याः गर्गा रौक्षायणा इति॥ चत्वारोपि भर
द्वाजा गोत्रैक्यान्नान्वयुर्मिथः॥ अत्र भरद्वाजकुले आग्निवेश्यास्तोमीय
शुंगस्य औरसः विश्वामित्रस्तोमीयशैशिरस्य क्षेत्रजः॥ अयमेताभ्यां
जातो द्विप्रवचनः॥ शौंगशैशिरिस्तद्गोत्रीयाणां विश्वामित्रभरद्वाजैर्न वि
वाहः॥ तथा चोक्तं आश्वलायनसूत्रे॥ अथ एते द्विप्रवचना॥ अथैते शु
गशैशिरयो भरद्वाजाः शुंगाः कताः शैशिरयस्तेषामुभयतः प्रवणीते क
मितरतो ह्यावितरतो द्वैवेतरतस्त्रीनितरतो न हि चतुर्णां प्रवरोस्ति॥ नपं

(८)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चातिप्रवरणं एषामांगिरस बार्हस्पत्य भारद्वाज कात्याक्षीलेति ॥ तथा
चोक्तं स्मृत्यर्थसारे ॥ भारद्वाजेन शुंगेन विश्वामित्रस्य शैशिरेः ॥ क्षेत्रेजा
तो द्विगोत्रर्षिः प्रोच्यते शौंग शैशिरीः ॥ विश्वामित्र भरद्वाजैस्त ज्ञानांते
न नान्वयः ॥ कपिलाः पुनर्गर्गवंश्याः विश्वामित्र मातामही पक्षीयाः स
र्वे भरद्वाजैर्मुख्य विश्वामित्रैश्च नोद्वहेयुः ॥ तथाचोक्तं ॥ कपिलानां भर
द्वाजैर्विश्वामित्रैश्च नान्वय ॥ इति ॥ भारद्वाजाग्निवेश्यपक्षीः शुंगाः शैशि
रयः कृताः ॥ इति ॥ विश्वामित्रकृतवंश्यशैशिरक्षेत्रजाः शौंग शैशिरय
इत्यर्थः ॥ एते समानगोत्रास्तु गर्गाने के वदंति वै ॥ इत्याश्वलायनगृह्यप
रिशिष्टं ॥ इति भरद्वाजप्रकरणं ॥ ॥ अथांगिरस पृषदश्वाः ॥ पृषदश्व ५
अंगिरसत्तम आंगिरस रथीतर अंगुष्ठादीनां त्रयः प्रवराः ॥ आंगिरस।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पार्ष्वदश्व।वैरूप्याइति॥अथवा अष्टादंष्ट्र पार्षदश्व वैरूप्याइति॥एतेषां
पृषदश्वादीनांसप्रवराणांपौनरुक्त्यपरिहारेणनामानुक्रमोलिख्यते॥
पृषदश्व।अंगिरस्तम।आंगिरस।रथीतर।अंगुष्ठ।आंगिरस।पार्ष्वद
श्व।वैरूप्य।अष्टादंष्ट्रादयः समानप्रवरसमानगोत्रत्वात्परस्परंनविवा
ह्याः॥इतिपृषदश्वप्रकरेकेणं॥ ॥अथांगिरसमुद्गलाः॥मुद्गलत्रिवेदा
दीनांत्रयःप्रवराः॥आंगिरस।भार्म्याश्व।मौद्गल्याइति॥अथवातार्क्ष्य
भार्म्याश्वमौद्गल्याइति॥एतेषांमुद्गलादीनांसप्रवराणांपौनरुक्त्यपरिहा
रेणनामानुक्रमोलिख्यते॥मुद्गल।त्रिवेदी।आंगिरस।भार्म्याश्व।मौद्गल्य।
तार्क्ष्यादयोमुद्गलवंश्याएतएवमिथोनविवाह्याः॥ इतिमुद्गलादिप्रक
रणंचतुर्थं॥ ॥अथांगिरसविष्णुवृद्धाः॥विष्णुवृद्ध१शाठ्मर२शाठ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मश्राण४ दभ्रण५ मद्गण६ मद्गण७ बादरायण८ औमचीति९ औपगवी१०
शात्यकी११ नितुंदि१२ जाम्य१३ आरुण्या१४ दीनांत्रयःप्रवराः॥ आंगिर
स१ पौरकुत्स्य२ त्रासदस्यावा३ इति॥ एतेषांविष्णुवृद्धादीनांसप्रवराणांप
रस्परंविवाहोनास्ति॥ एतेषुआश्वलायनप्रवरोक्काप्येकेविष्णुवृद्धाःतत्प्र
वरपुरुषाःआंगिरसपौरकुत्स्यत्रासदस्यावइति॥ अपरेयेविष्णुगणम
ध्येपठिताःतेआपस्तंबप्रवरमहाप्रवरव्रातस्मृतिनिबंधज्योतिःशास्त्रा
दिषुपरिगणिताः॥ आंगिरस१ विष्णुवृद्ध२ बादरायणा३ इति॥ एवमेवस
र्वप्रकरणेषुज्ञेयं॥ ॥इतिविष्णुवृद्धादिप्रकरणंपंचमं॥ अथांगिरसःक ६
ण्वाः॥ कण्वादीनांत्रयःप्रवराः॥ आंगिरस। आजमीढ। काण्वइति॥ अ
थवैतेत्रयः॥ आंगिरस। घोर। काण्वाइति। एतेषांसप्रवराणांपरस्परंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाहो नास्ति॥ इति कण्वादिप्रकरणं॥ अथांगिरसहारिताः॥ हरित १ कुत्स २
पिंग ३ शंख ४ दर्भ ५ भीमगव ६ वक्रगव ७ चित्रगव ८ कौमारादीनां त्रयः प्र
वराः॥ आंगिरस १ आंबरीष २ यौवनाश्वेति ३ अथवा मांधात्रांबरीषयौवना
श्वेति॥ एतेषां हारितादीनां सप्रवराणां मिथो न विवाहः॥ इति हरितादिप्र
करणं॥ अथांगिरससंकृतयः॥ ते वासिष्ठगोत्राश्च भवंति॥ अतो द्विवंश्याः॥
संकृती १ पूतिमाष २ तंडी ३ शंबु ४ शैंब ५ गर्वचक्र ६ गववक्र ७ दंडकुटि
ल ८ दंडदीर्घ ९ दंडपभाक्ष १० सिंहपाद ११ सिद्दपाद १२ तरपाद १३ पूतपाद
१४ वैयाघ्रपद्य १५ दीनां त्रयः प्रवराः॥ आंगिरसगौरीवित सांकृत्या इति॥
अथवा शाक्त्यगौरीवित सांकृत्या इति॥ एते संकृत्यादयो वैकल्पिकप्रवर
पुरुषद्वययुक्ता अपि चतुर्विधवसिष्ठैर्मिथोपि पूर्वजांगिरोभिश्च न विवा
ह्याः॥ तथा चोक्तं स्मृत्यर्थसारे॥ संकृतीनां द्विवंश्यत्वाद्वसिष्ठैश्च चतुर्विधैः॥

93

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ववर्गीयैः सगोत्रत्वात्स्ववरैक्याच्चनान्वयः॥ इतिसंख्याधिकरणं॥पूर्वाप
राधिकंन्यूनं स्वर वर्णपदक्रमैः॥ ऋष्योषधीनदीग्रामांश्चिंतयेन्नैवसंस्कृ
त्तैः॥अथांगिरसकपयः॥कप्यादीनांत्रयः प्रवराः॥आंगिरस॥आमह
य्य॥उरूक्षय्येति॥एषांकप्यादीनांसप्रवराणांमिथोनविवाहः॥गर्गकुले
पिकपयः संति॥अतएषांतेषांप्रवरेणभेदः॥ इतिकप्याधिकरणं॥अथउ
क्तभृग्वंगिरोगणेषुकिंचिदुच्यते॥ऋग्वेदगृह्यप्रवरमार्गेण॥तथाआर्षे
याणांत्र्यार्षेयाणांसन्निपातेअविवाहः॥ आर्षेयाणांपंचार्षेयाणांसन्नि
पातेअविवाहः॥अस्यायमर्थः॥त्रयाणांप्रवरपुरुषाणांयत्रगणांतरेद्व
योः प्रवरपुरुषयोःअनुवृत्तिः अयमेव सन्निपातः॥तथायत्रगणेपंचप्र ८
वरपुरुषाः संतितेषांमध्ये त्रयाणां प्रवरपुरुषाणांअनुवृत्तिःससंनिपा
तः॥तेषांपरस्परंविवाहोनास्तीतिभावः॥कश्यपादिप्रवरेषुएकप्रवर
पुरुषानुवृत्तावपिपरस्परंविवाहोनास्ति॥तथाचोक्तंस्मृत्यर्थसारे॥पं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा चोक्तं स्मृत्यर्थसारे॥ पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः॥ भृ
ग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेत् इति॥ विवाहमिति शेषः॥ एक ए
व ऋषिर्यत्र प्रवरेष्वनुवर्त्तते॥ तावत्समानगोत्रत्वमृते भृग्वंगिरोगणाद्
इति॥ अन्यत्र भृग्वंगिरसांगणादिति॥ पृषदश्वा १ मुद्गला २ विष्णुवृद्धा ३ कृ
ण्वा ४ गर्ग्या ५ हरिता ६ संकृति ७ कपि ८ यस्क ९ श्चैषां मिथइष्टो विवाहः।
सर्वैरन्यैर्जामदग्न्यादिभिश्चेति श्रुतिः॥ अत्र वाक्ये अगस्त्यः स्वतंत्रः य
स्को भार्गववंशाः एते सप्तांगिरसाः गौतमभरद्वाजौ च तेषां स्वस्वगणे व्यति
रेकेणांगिरसगणांतरे विवाहोस्त्येव॥ एवं नवगणस्थऋषिगोत्राणां आं
गिरसगोत्रीयैः सह विवाहो नास्त्येवेत्यर्थः॥ आंगिरसवैरूपरथीतरास्ते
षां पंचार्षेयाः प्रवरो भवति॥ पृषदश्वेप्यंगिरसोप्यष्टादंष्ट्रो हि पाक्षिकः॥ विरू
पश्चोत्तमः पार्थीव्यत्यये न रथीतरः॥ इत्यांगिरसप्रकरणं॥ अथ कश्यपग
णः॥ श्रुद्वास्तुः कश्यपा अन्ये निध्रुवा रिभ शांडिलाः॥ काश्यपा इति चत्वारः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्ताप्रवरभेदतः॥ तत्रादौ प्रवरनिर्णयः॥ तत्र शुद्धकश्यपादीनां त्रयः प्रव
राः॥ काश्यपअवत्सारअसितेति॥ नैध्रुववैशंपायनभूतांशुरूमेधसादी
नां त्रयः प्रवराः॥ काश्यपावत्सारनैध्रुवाइति॥ अस्य रूमेधसः उत्पन्नविर
क्तत्वात्गोत्रप्रवर्तकत्वं नास्ति॥ रेभादीनां त्रयः प्रवराः॥ काश्यपावत्साररैभ्ये
ति॥ शांडिलसौजामिनीभागुरीधण्वंतर्यादीनां त्रयः प्रवराः॥ शांडिल्यासित
देवलेति॥ अथवा काश्यपासितंदेवलाइति॥ अथ काश्यपचतुर्गणस्थानां ऋ
षीणां प्रवराणां पौनरुक्त्यपरिहारेण नामानुक्रमो लिख्यते॥ कश्यप१ काश्यप२
अवत्सार३ असित४ निध्रुव५ वैशंपायन६ भूतांशु७ रूमेधाः८ नैध्रुव९ रेभ१०
रैभ११ शांडिल१२ सौजामिनी१३ भागुरी१४ धण्वंतरी१५ शांडिल्य१६ देवल१७ इत्याद्या
दयः॥ लौगाक्षादयश्च॥ एतेषु लौगाक्ष्यादीव्यतिरेकेण चतुर्गणस्थाः कश्यपाः
परस्परं समानगोत्रप्रवरत्वादविवाह्याः॥ लौगाक्षीगोत्रियास्तु वक्ष्यमाणवसिष्ठ
प्रकरणां तेदिवा वशिष्ठ रात्रि कश्यपानां त्रयोदशानां मनुष्यादीनां सप्रपंच
वक्ष्यमाणानां उपलक्षणार्था॥ एते वशिष्ठ कश्यपैरविवाह्याः॥ उक्तं च स्मृत्य

(१६)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थसारे॥ वशिष्ठैः कश्यपैर्नित्यं लौगाक्षाणामनन्वयइति॥ अत्रयदुक्तंस्म
त्यर्थसारे त्रिगणत्वं कश्यपानां॥ त्रयश्च कश्यपगणा नैध्रुवारेभशांडिलाः॥
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परमिति॥ अत्रोक्तं हि परं॥ ब्रह्मवैराट्
मभवच्छिवः॥ शंभोर्विष्णुस्ततो ब्रह्मा मरीचिः कश्यपस्ततः॥ वेदादौ यजुषो
रूपं शिरः प्रथमतोभवत्॥ शांभवी याजुषी सृष्टिर्वासिष्ठी काश्यपी पुरा॥
अष्टधास्य स्थिरखिला ततः सर्वमभूज्जगत्॥ इति निगमः॥ मरीचेः कश्यपः
पुत्रः कश्यपस्य महाकुले॥ गोत्रकारानहं वक्ष्ये तेषां नामानि मे शृणु॥४॥ त
थाश्च लिंगपुराणे॥ कश्यपो गोत्रकामस्तु चचार च पुनस्तपः॥ पुत्रो गोत्रकृ
रो मह्यं भवतादिति चिंतयन्॥५॥ तस्यैव ध्यायमानस्य कश्यपस्य महात्म
नः॥ ब्रह्मयोगात्सुतौ पश्चात्प्रादुर्भूतौ महौजसौ॥६॥ अवत्सारोसितश्चै
व ताबुभौ ब्रह्मवादिनौ॥ वत्सारान्नैध्रुवो जज्ञे रेभश्चैव महायशाः॥७॥ रै
भ्यश्च रेभाद्वै जज्ञे नैध्रुवस्य वदामि वः॥ च्यवनस्य तु कन्या या सुमेधा सम
पद्यत॥८॥ नैध्रुवस्य तु या पत्नी माता वै कुंडपायिनः॥ असितस्यैकपर्णायां

96

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमान् देवलः सुमहातपाः॥
श्लिष्टः समपद्यत॥९॥ शांडिल्यानां वरः श्रीमान् देवलः सुमहातपाः॥ इति कश्यपानां
शांडिल्यानैध्रुवारेभ्यास्त्रयः पृष्टास्कृकाश्यपाः॥१०॥ यथा आश्वलायनश्रौ
त्रिगणित्वमुक्तं॥ तत्खुदु कश्यपव्यतिरेकेण ज्ञेयं॥ प्रवरस्तोमनिर्णये चतुष्टयाभिधाना
तौ गोत्रप्रवरनिर्णये कश्यपानां प्रवरस्तोमनिर्णये चतुर्गणत्वमभिहितं कश्यपाना
त्वगण चतुष्टयमुक्तं॥ तथा महाप्रवरेपि चतुर्गणत्वमभिहितं॥ अथात्रिगणश्च॥ चत्वारो
मिति॥ इति कश्यपप्रकरणं तृतीयं समाप्तं॥ अत्रिर्गविष्ठिरश्चैव बाहुतंकसुमं
त्रिगणाद्वौ रुकुसूत्रे द्वावन्यतोपरौ॥ अत्रिर्गविष्ठिरश्चैव बाहुतंकसुमं
उलौ॥ सुमङ्गल इत्यपि पाठोस्ति॥ तत्रादौ प्रवरनिर्णयः॥ अत्रि१ प्रथमा
त्रेय२ स्वस्त्यात्रेय३ रुक्मात्रेय४ गौरात्रेय५ नीलात्रेय६ श्वेतात्रेय७ अ
रुणात्रेय८ चंद्रात्रेय९ महात्रेय१० दत्तात्रेय११ इंद्रात्रेय१२ धूम्रात्रेय१३ शु
क्लात्रेय१४ मुद्गात्रेय१५ आत्रेय१६ श्यामात्रेय१७ सर्वात्रेय१८ अनात्रेय१९
अन्यात्रेय२० वामरथ्यादीनां त्रयः प्रवराः॥ आत्रेय१ अर्चनानस२ श्या

वाम्यइति॥गविष्ठिरादीनांत्रयः प्रवराः॥आत्रेयगाविष्ठिरपौर्वातिथ्ये
ति॥बाऊतंकादीनांत्रयः प्रवराः॥आत्रेय अर्चनानसाशावाम्येति॥अ
त्रिबातंकगणयोः प्रवरैक्यप्यवांतरधर्मभेदाद्गणभेदः॥सुमंगलबी
जवाप्यादीनांत्रयः प्रवराः॥आत्रेयसुमंगलशावाम्येति॥अथात्रीच
तुर्गणस्थानामृषीणां सप्रवराणां पौनरुक्त्यपरिहारेण नामानुक्रमोलि
ख्यते॥अत्रि१ प्रथमात्रेय२ स्वस्यात्रेय३ रुक्मात्रेय४ चंद्रात्रेय५ वा
मरथ्य६ आत्रेय७ अर्चनानस८ शावाम्य९ गविष्ठिर१० गाविष्ठिर११
पौर्वातिथ्य१२ बाऊतंक१३ सुमंगल१४ बीजवापी१५ सौमंगल्यादयः १६
अत्रिवंश्या मिथो न विवाह्याः॥तथा च स्मृत्यर्थसारे॥ चत्वारोत्रयआ
धात्रीबाऊतंकगविष्ठिराः॥सुमंगलाख्यगोत्रैक्यात्प्रवरैक्याच्च नान्वियु
रिति॥विश्वामित्रकुलोत्पन्नाधनंजयामातामहैरत्रिभिर्न विवाह्याः॥
तथात्रिवसिष्ठकुलोत्पन्नौ॥वामरथ्यजातूकर्ण्यावपि मातामहैः शुद्धव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिष्ठात्रिभिर्नविवाह्याः॥तथाचोक्तं स्मृत्यर्थसारे॥विश्वामित्रात्रिगोत्रैस्तु
नोद्वहेयुर्धनंजयाः॥अत्रेस्तु पुत्रिकापुत्रावामरथ्यादयस्तथा॥तथैवजातू
कर्ण्याश्च वसिष्ठैरत्रिभिः सहेति॥ ॥इत्यात्रिप्रकरणं चतुर्थं॥अथविश्वामि
त्रगणाः॥आश्वलायनसूत्रोक्तप्रवरस्तोमभेदतः॥विश्वामित्रगणान्वक्ष्ये
क्रमेण द्वादशाधुना॥बौधायनोक्ताप्रवरे विश्वामित्रगणादश॥तेष्वेवांत
र्गतौ रेणवेणुइत्येवतन्मतं॥२॥अथ धौरेयानुक्रमः॥सुमुद्गलइत्यपिपा
ठोस्ति॥चिकिताश्चोमताइत्यपिपाठोस्ति॥विश्वामित्राः श्चोमताश्च धनं
जयाजरौहिणः॥अष्टकाश्चरणा अन्ये कताश्चैवाघमर्षणाः॥रेणवो वे
णवश्चैव शालंकायणगोत्रजाः॥द्वादशैते गणा ग्रण्या विश्वामित्रस्य वं
राजाः॥४॥अथप्रवरनिर्णयः कथ्यते॥विश्वामित्र१देवरात२चिकित३ १०
गालव४कालव५काल६वव७मनु८तनु९कुशिक१०कौशिक११औ
लकित१२वालखिल्य१३याज्ञवल्क्य१४उलूखल१५बृहदग्नि१६बभ्रु१७
शाल१८विशाल१९आवाह२०कालभवा२१दीनांत्रयः प्रवराः॥विश्वामित्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवरातऔदला इति॥१॥ श्रौमतकामकायनादीनांत्रयःप्रवराः॥ वैश्वामि
त्रदैवश्रवसदैवतरसेति॥२॥ धनंजयादीनांत्रयःप्रवराः॥ वैश्वामित्रमाधु
छंदसधनंजया इति॥३॥ अजादीनांत्रयःप्रवराः॥ वैश्वामित्रमाधुछंदस
आज्येति॥४॥ रौहिणादीनांत्रयःप्रवराः॥ वैश्वामित्रमाधुछंदसरौहिणा इति॥५॥
अष्टकादीनांत्रयःप्रवराः॥ वैश्वामित्रमाधुछंदसअष्टका इति॥६॥ पूरणादी
नांत्रयःप्रवराः॥ वैश्वामित्रमाधुछंदसपौरणा इति॥७॥ कतरौक्षायणादी
नांत्रयःप्रवराः॥ वैश्वामित्रकात्यआक्षीलेति॥८॥ अघमर्षण १ सुनुप्रवास २
धूम्र ३ जठर ४ वर्ग ५ एकहम्र्द ६ अग्निदेव्यादीनांत्रयःप्रवराः॥ वैश्वामित्र
अघमर्षणकौशिका इति॥९॥ रेण्वादीनांत्रयःप्रवराः॥ वैश्वामित्रगाथीनरै
णवा इति॥ वेण्वादीनांत्रयःप्रवराः॥ वैश्वामित्रगाथीनवैणवा इति॥ शालं
कायन १ शालाक्षी २ लोहिताक्ष ३ लोहित ४ जन्तु ५ इंद्रकौशिक ६ घृतकौशिका
दीनांत्रयःप्रवराः॥ वैश्वामित्रशालंकायनकौशिका इति॥ तत्रयस्कं वेरोपि
शालंकायनाःसंति॥ अत्रचतेषामेषांचप्रवरेणनिर्णयः॥ अथविश्वामित्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशगणस्यानामृषिणां प्रवरपुरुषसहितानां पौनरुक्त्य परिहारेण
नामानुक्रमो लिख्यते ॥ वैश्वामित्र १ देवरात २ चिकित ३ गालव ४ कालव ५
काल ६ यव ७ मनु ८ तनु ९ कुशिक १० कौशिक ११ औलंकित १२ वालखिल्य
१३ याज्ञवल्क्य १४ उलूखल १५ बृहदग्नि १६ बभ्रू १७ शाल १८ विशाल १९ आ
वाह २० कालभव २१ वैश्वामित्र २२ देवरात २३ अदेल २४ श्रोमत २५ कामका
यन २६ देवश्रवस २७ दैवतरस २८ धनंजय २९ माधुछंदस ३० धानंजय ३१
अज ३२ आज्य ३३ रोहिण ३४ रोहिण ३५ अष्टक ३६ आष्टक ३७ पूरण ३८
वारिधापन ३९ पौरण ४० कत ४१ रौक्षण ४२ ॥ कात्य ४३ आक्षील ४४ अघ
मर्षण ४५ सुनूपवास ४६ धूम्र ४७ जगर ४८ वर्ग ४९ एकरुव्य ५० अग्नि
दैव्य ५१ अघमर्षण ५२ रेणु ५३ वेणु ५४ गाथीन ५५ रैवण ५६ शालंकाय
न ५७ शालाक्ष ५८ लोहिताक्ष ५९ लोहित ६० जनु ६१ इंद्रकौशिक ६२
घृतकौशिक ६३ शालंकायनादयः ॥ विश्वामित्रवंश्या द्वादशगणस्याः
विश्वामित्रानुवर्त्तेर्मिथो विवाहा न भवंति ॥ उक्तं चाश्वलायनसूत्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर निर्णय परिशिष्टे ॥ यावत्समानगोत्रत्वं विश्वामित्रानुवर्त्तते ॥ ता
वद्द्विशिष्टश्चात्रिश्च कश्यपश्च पृथक् पृथगिति ॥ अस्यार्थः ॥ यावद्वि
श्वामित्रोनुवर्त्तते तावत्समानगोत्रत्वं तया स्वीये स्वीये गणसमूहे क
शिष्टः अत्रिः कश्यपश्च पृथक् पृथक् इति एकैको यावदनुवर्त्तते ताव
त्समानगोत्रत्वमित्यर्थः ॥ विश्वामित्रगणस्थ कतवंश्य शिशिरक्षेत्र
जः शौंगशैशिरीर्यथा भरद्वाजैर्यथा विवाहे नान्वेतितथा सर्वविश्वा
मित्रैरपर भारद्वाजैस्तज्ज्ञानांते न नान्वय इति ॥ भरद्वाज कुलोत्पन्नग
र्गवंश्यकपिर्यथा भरद्वाजैर्विवाहे नान्वियंति ॥ तथा मातामहपक्षिये
मुख्यविश्वामित्रैरपि ॥ तथा चोक्तं स्मृत्यर्थसारे ॥ कपिलानां भरद्वाजै
र्विश्वामित्रैश्च नान्वयः इति ॥ तथा देवरातानां मातामहैः शुद्धजामद
ग्न्यैर्न विवाहः ॥ उक्तं च ऋग्वेदगृह्यपद्धता वादित्यभट्टपंत ॥ जामदग्न्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वामित्राणां देवरातवर्ज्यं मिथो विवाहोऽस्ती।ति।।तथा धनंजया नामा
तामहैः मुख्यात्रेयैर्न विवाहः।।उक्तं च स्मृत्यर्थसारे।। विश्वामित्रात्रिगोत्रै
स्तु नोद्वहेयुर्धनंजयाः।।अत्रेस्ते पुत्रिकापुत्रा वामरथ्यादयस्तथा।।इ
त्यादि।।इति विश्वामित्रप्रकरणं पंचमं।।अथ वशिष्ठगणः।।चतुर्गणाव
।सिष्ठानां मुख्यानां दत्तकोपरः।।इत्थं पंच गणाः प्रोक्ता वसिष्ठस्य महर्षि
भिः।।१।।ब्रह्मणो मानसः पुत्रो वसिष्ठस्तत्तृतीयकः।।वासिष्ठांस्तत्परे सर्वे
वासिष्ठा इति तद्विदः।।२।।सर्वप्रकरणेष्वेवं नामानिर्वचनं भवेत्।।वाशिष्ठा
स्त्वेकप्रवरा वाशिष्ठस्ते चतुर्थकाः।।३।।एते सर्वे वासिष्ठाः स्युर्मित्रावरुणतः
परेः।।वाशिष्ठा मैत्रावरुणकौंडिन्या प्रवरा अमी।।४।।श्रुतिस्मृतिपुराणेषु
वासिष्ठो ब्रह्मणो यथा।।मित्रावरुणजस्तद्वज्जातो सोपश्यत द्यथा।।५।।
उत्तासि मैत्रावरुणो वासिष्ठोर्वश्या ब्रह्मन्मनसोधिजातः।।द्रप्सं स्कन्नं
ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वाददंत।।इति श्रुतेः।।स्मृतावप्ययम
र्थः सुसिद्धः।।पुराणप्रसिद्धश्चायमर्थः।।सप्रपंचमुत्तरप्रकरणांते वक्ष्यते।।

१२

(२४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलमातिविस्तरेण॥ प्रकृतमनुसरामः॥ उद्वा वासिष्ठा उपमन्यवश्च परा
शराः कुंडिनजाश्चतुर्था॥ वासिष्ट शात्त्या उपनीतदत्तौ पुत्रास्तथा संस्कृ
तयोपरेच॥ तत्रादौ प्रवरनिर्णयः कथ्यते॥ ब्रह्मपुत्राणां शुद्ध वसिष्ठानां मेकः
प्रवरः॥ वासिष्ठ इति॥ उपमन्यू उपोपमन्यादीनां त्रयः प्रवराः॥ वासिष्ठ १
आभरद्वसु २ ऐंद्रप्रमद ३ इति॥ पराशर व्यासादिगोत्रीयाणां त्रयः प्रवराः॥ वा
सिष्ठ १ शात्त्य २ पाराशर्या ३ इति॥ कुंडिन वासिष्ठ गुत्स जातूकर्ण्य सांख्याय
नादीनां त्रयः प्रवराः॥ वासिष्ठ मैत्रावरुण कौंडिन्या इति॥ संकृति पूतिमाष
तंडि शंबु शैंब गवबे याघ्रपघादीनां त्रयः प्रवराः॥ आंगिरस गौरीवितसां
कृत्या इति॥ यद्वा शात्त्य गौरीवितसांकृत्या इति॥ अथ पंचगण स्थानामृषी
णां सप्रवराणां पौनरुक्त्य परिहारेण नानुक्रमो लिख्यते॥ वसिष्ठ १ वासिष्ठ २
उपमन्यू ३ औपमन्यु ४ उपोपमन्यु ५ आभरद्वसु ६ ऐंद्रप्रमद ७ पराशर ८
शात्ति ९ शात्त्य १० पाराशर्य ११ कुंडिन १२ गुत्स १३ जातूकर्ण्य १४ सांख्यायन १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रावरुण१६ कौंडिन्य१७ संकृति१८ पूतिमाष १९ तंडि२० शांबु२१ शैंबगव२२
वैय्याघ्रपद्य२३ गोरीवित२४ सांकृत्य२५ एते परस्परमविवाह्याः॥ चतु
र्गणे वासिष्ठानुवृत्तेः संकृतिमुख्यस्य यथांगिरस कुलोत्पन्नत्वात्तैरंगि
रोभिरविवाहः॥ तद्वद्वसिष्ठपुत्रे शाक्त्ये दत्तकपुत्रत्वाच्छाक्त्यस्य पाराशिक
प्रवरांतर्गतत्वाच्च संकृतिगणस्य सर्वैर्वसिष्ठैर्नविवाह्याः॥ तथा चोक्तं
स्मृत्यर्थसारे॥ संकृतीनाद्विवंश्यत्वाद्वसिष्ठैश्च चतुर्विधैः॥ स्वचगरि
येः सगोत्रत्वात्प्रवरैश्चाच्चनान्वयः॥ संतिसंकं॥ ॥ विश्वामित्रात्रि
गोत्रैस्तु नोद्वहेयुर्धनंजयाः॥ अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्त
था॥१॥ तथैव जातूकर्ण्याश्च वासिष्ठैरत्रिभिः सहेति॥ नोद्वहेयुरिति
वाक्यशेषादनुरज्यते॥ गौतमकुलोत्पन्नानां सोमराजवंश्यानां आन
स्यादीनां त्रयोदशानां मृषीणां सोमराजकैर्वासिष्ठकाश्यपकुत्सयो
र्मिलीतयोः कन्याप्याप्यासमस्वाम्येन विक्रीतत्वात्तयोः समत्वेन गा
तास्त्रयोदशान्तेन वसिष्ठकाश्यपैरुभयेषां कथममी शिष्यत्वेन संबं १२

२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिनो भविष्यतीति विचार्य स्वरूच्या समयबलेन व्यवस्था कृता॥ अमी
त्रयोदश दिवावसिष्ठानां रात्रौ कश्यपानामिति॥ तदाप्रभृति तेन तेन
नत्काात्वं तेषां तेषां च भवंति॥ ततो येषां वहु भयेषां शुश्रूषणरताः श्रीते
र्वसिष्ठैर्दिवा सगोत्राः कृताः॥ तद्द्रात्रौ कश्यपैः स्वगोत्राः कृताः इति॥
ते हि प्रवंचनाः॥ तथा चोक्तं कृत्न सूत्रानुसारिण्या माधिलभट्यां मे
धदेवाग्रसिद्धायामन्य ज्ञुर्गत्यपद्धतौ स्मृति सूत्र पुराण संवादी प्रवर
निर्णयप्रसंगेन यथा॥ आनर्घ्यो ३ वानकूल २ स्नतयो ३ राजचारिणः ४
स्वैर ५ क्षीरज ६ वाऊश्व ७ सैरंधी ८ राजसेवक ९ गोपवत्सक इ सापिपा
ठोस्ती॥ आसुचि १० वाप्तुलिंगाक्षी ११ लोगाक्षी १२ शारदंवकः १३ एते
त्रयोदश प्रातर्वसिष्ठा निशि कश्यपाः॥ अहर्वसिष्ठा निशि कश्यपानां व
सिष्ठ कश्यपवर्जं सर्वत्र विवाह इति॥ समयकृतिव्यवस्थायाममिहोत्र
प्रसंगेन सूर्यास्तेव्यवस्थापि कापुरा कल्प सरूपा तैत्तिरीयश्रुतिः पद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते॥तस्मादग्निहोत्रमुच्यते॥तद्धयमानमादित्योब्रवीत्साहौषीः उभयो
र्विनानैतदिति।सोग्नीरब्रवीत्॥कथंनौहोष्यंतीति।सायमेवतुभ्यंजुहुवप्रा
तर्मह्यमित्यब्रवीत्॥तस्मादग्नयेसायंहूयते॥सूर्यायप्रातरीत्यादिपरम
गुप्तं॥इतिवसिष्टप्रकरणंषष्टं॥अथागस्त्यगणाः॥अगस्त्यानांगणैकत्वमा
श्वलायनमार्गतः॥प्रवरस्यद्विधाभेदोबौधायनमतेत्रिधा१॥वैकल्पिकेतु
प्रवरेगस्त्योदार्ढ्यच्युतोपरः॥ऐध्मवाहःसोमवाहःसारवाहेतिमोथवा
॥२॥तत्रादौप्रवरनिर्णयः॥अगस्त्यादीनांत्रयःप्रवराः॥आगस्त्य१दार्ढ्य 14
च्युत२इध्मवाह३इति॥अथवाआगस्त्य१दार्ढ्यच्युत२सोमवाह३इति
अथवाआगस्त्यदार्ढ्यच्युतसारवाहइति॥अथपोनरुक्त्यपरिहारेणस
प्रवराणांगणनाक्रियते॥अगस्त्य१दार्ढ्यच्युत२आगस्त्य३इध्मवाह४सोम
वाह५सारवाह६एतेषांसप्रवराणांअगस्त्यगणस्थानांपरस्परंमविवाहः॥
इतरैःसर्वैरत्तेविवाह्याभवंति॥अत्रकेचिदाक्षिपंति॥अन्यैर्विवाह्याइ
तरैःसर्वैरत्तेविवाह्याइतिभवंति॥अतः॥मित्रावरुणयोःउ
त्क्रत्केनतुवसिष्टैःकथममीविवाह्याइतिभवंति॥अतः॥मित्रावरुणयोःउ

(20)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वशीदर्शनेन कुंभे रेतोपतत्॥ ततोगस्त्यवसिष्ठावजायेतामिति श्रुतेः॥
भिन्नपितृकयोरेकगृहोत्पत्तिरितिवत्॥ तन्न॥ मैत्रावरुणीरित्येकसं
ज्ञाविषयत्वादुभयोः अत एककालीभावेन मित्रावरुणयोर्द्वावपि पुत्रा
विति भ्रात्रोः कथं विवाह इति॥ तत्र केचिदेवं परिहरंति॥ न तौ भ्रातरौ॥
व्यवस्थितपितृकत्वेनोत्पत्तेः श्रुतिस्तु॥ उर्वशीदर्शने सति मित्रस्य व
रुणस्य च क्रमेण रेतसः पतनात्तदेव पृथक्पृथक्कृतयोर्घनीभूतयो
र्गर्भयोरुत्पत्तिः॥ भिन्नजात्योरेकगृहोत्पत्तिवत्॥ कुंभे समभूतौ इति
व्याख्या कर्त्तव्या॥ एकसंज्ञाविषयत्वं च एककुंभदेशसमानकालोत्प
त्तेः॥ मित्रावरुणयोर्नित्यसाहचर्यादेकदेवतत्वाच्च॥ तया विवक्षयाप्र
योजनाभावाच्चेति॥ तथा च विष्णुपुराणे॥ माता भस्त्रा पितुः पुत्रो येन
जातः स एव सः॥ सुत इति वचनाच्च॥ मातुः अकरणत्वात्॥ पित्रोस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिन्नत्वं मित्रावरुणाभ्यां क्रमेण वसिष्ठागस्त्यावुत्पन्नौ न भ्रातरा विति॥ वि
वाह्यो द्वयोर्वंशा विति सर्व मनवद्यं॥ भृग्वंगिरः कश्यपात्रि विश्वामित्र वसि
ष्ठकाः॥ अगस्त्य इति सप्तर्षीः क्रमात्स्त्रवरणानि तु॥ सप्तर्षीणां त्रिपंचात्रा
परन्तु ख्यावांतरभेदतः॥ गणाः श्रीकाइहेवान्येनं तावंशाः प्रतिष्ठिताः॥
इति संग्रहोध्द गोत्रप्रवरनिर्णयः समाप्तः॥ छ॥॥

२५

(30)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 10:17
,TRANSFERRED=2020/10/21 at 10:24:00
,PAGES=30
,TYPE=STD
,NAME=S0004265
,Book Name=M-871-GOTRAPRAVAR NIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection